॥ श्रीजिनाय नमः ॥

( श्रीधर्मदासगणीकृत )

# ॥ प्रसन्नचंद्रराजर्षिचरित्रम् ॥

मुद्रयित्वा प्रकाशकः-पण्डित हीरालाल हंसराज—( जामनगरवाळा )

संवत् १९९० किंमत रु. ०-१२-० सने १९३४

जैनभास्करोदय मुद्रणालय—जामनगर

आ.श्री. कैलाससागर सूरि ज्ञान मंदिर
श्री महावीर जैन आराधना केन्द्र, कोबा
ता. क.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

Serving JinShasan
050396
gyanmandir@kobatirth.org

॥श्री जिनाय नमः ॥

# ॥ अथ श्रीप्रसन्नचंद्रराजर्षिचरित्रम् प्रारभ्यते. ॥

( गद्यबद्ध )

छपावी प्रसिद्ध करनारः-

पंडित श्रावक हीरालाल हंसराज. जामनगर.



पोतनपुरे नगरे प्रसन्नचंद्रो राजा बभूव, सोऽतीवधार्मिकः सत्यवादी न्यायधर्मैकनिपुणः, स एकदा संध्यायां गवाक्षस्थितो नगरस्वरूपं विलोकयति, तस्मिन्नवसरे नानावर्णान्यभ्राणि जातानि, संध्यारागः संजातः, तं दृष्ट्वाऽतीवहर्षितो राजा मुहुर्मुहुर्विलोकयति, तत्संध्यास्वरूपं क्षणिकं दृष्टनष्टमिव नष्टं, राज्ञा चिंतितं क्व गतं संध्यारागसौंदर्यं ? अनित्यता पुद्गलानां, संध्याराग इव देहोऽप्यनित्यः, संसारे प्राणिनां किमपि सुखं नास्ति, यदुक्तं—दुःखं स्त्रीकुक्षिमध्ये प्रथममिह भवे गर्भवासे नराणां । बालत्वे चापि दुःखं मललुलितवपुः स्त्रीपयःपानमिश्रं ॥ तारुण्ये चापि दुःख

श्री महावीर जैन आराधना केन्द्र, कोबा
आचार्य श्री कैलाससागर सूरि ज्ञान मंदिर

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

भवति विरहजं वृद्धभावोऽप्यसारः। संसारे रे मनुष्या वदत यदि सुखं स्वल्पमप्यस्ति किंचित् ॥ १ ॥ एवं वैराग्यरंगेण रंजितमना राजा चिंतयति संसारे वैराग्योपमं सुखं नास्ति. यदुक्तं—भोगे रोगभयं सुखे क्षयभयं वित्तेऽग्निभूभृद्भयं। दास्ये स्वामिभयं गुणे खलभयं वंशे कुयोषिद्भयं माने म्लानिभयं जये रिपुभयं काये कृतांताद्भयं। सर्वं नाम भयं भवेच्च भविनां वैराग्यमेवाभयं ॥१॥ एवं वैराग्यपरायणो राजा स्वं पुत्रं राज्ये स्थापयित्वा स्वयं दीक्षां जग्राह. तत्कालकृतलोचो भूमौ विहरन् राजगृहोद्याने कायोत्सर्गमुद्रया तस्थौ. तस्मिन्नवसरे श्रीमान् वर्धमानस्वामी ग्रामाद्ग्रामं विहरन् चतुर्दशसहस्रसाधुपरिकरितः सुरनिर्मितकांचनकमलोपरि चरणौ धारयन् राजगृहे गुणशैले चैत्ये समवासार्षीत्, सुरैरागत्य समवसरणं निर्मितं. वनपालका झटिति नगरे समेत्य श्रेणिकं विज्ञपयामासुः, स्वामिन् भवदीयमनोवल्लभाः श्रीवर्धमानस्वामिनो वने समवसृताः. एतद्वनपालकवचनं श्रुत्वा राजाऽतीव हृष्टः कोटिप्रमितं धनं तस्मै ददौ, स्वर्णजिह्वां च ददौ. तदनंतरं राजा महताडंबरेण जिनवंदनार्थं चलितः, तस्य राज्ञः सैन्यमुखे सुमुखदुर्मुखनामानौ द्वौ दंडधरौ चलितौ. तदनु ताभ्यां प्रसन्नचंद्रो मुनिर्वने कायोत्सर्गमुद्रया स्थितो दृष्टः, सुमुखेनोक्तं धन्योऽयं मुनिः, येनैतादृशी महती राज्यलक्ष्मीस्त्यक्ता, संयमश्रीश्च गृहीता, एतस्य नाम्नापि पापं याति, किं पुनः सेवनेन ? तदा दुर्मुखेनोक्तं अधन्योऽयं महापापोऽयं मुनिः किमिमं पुनः पुनर्वर्णयसि ? एतेन समः कोऽपि पापभाग् नास्ति. सुमुखेन मनसि चिंतितं अहो दुर्जनस्वभावोऽयं यद् गुणेषु दोषमेव गृह्णाति यदुक्तं—आक्रांतेव महोपलेन मुनिना शप्तेव दुर्वाससा। सातत्यं बत मुद्रितेव जतुना नीतेव मूर्छां विषैः ॥ बद्धेवाऽतनुरज्जुभिः परगुणान् वक्तुं न शक्ता सती। जिह्वा लोहश-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

लाकया खलमूखे विद्वेव संलक्ष्यते ॥ १ ॥ तथा चोक्तं—आर्योऽपि दोषान् खलवत्परेषां । वक्तुं हि जानाति परं न वक्ति ॥ किं काकवत्तीव्रतराननोऽपि ! कीरः करोत्यस्थिविघट्टनानि ॥ २ ॥ ततः सुमुखेनोक्तं भो दुर्मुख किमर्थमेनं मुनीश्वरं महात्मानं निंदसि ? तदा दुर्मुखेनोक्तं भो एतस्य नामापि न गृहीतव्यं. यदयं पंचवार्षिकं बालं राज्ये स्थापयित्वा निर्गतः, परंत्वेतद्वैरिभिर्मिलित्वा एतन्नगरमुल्लूसितं, एतदीयाः पौरजनाः क्रंदंति, विलापं कुर्वंति, महद्युद्धं जायते, अधुना ते एतदीयं बालकं निहत्य राज्यं गृहीष्यंति, एतत्सर्वं पापमेतच्छिरसि, इति श्रुत्वा ध्यानस्थितेन प्रसन्नचंद्रराजर्षिणा चिंतितमहो मयि स्थितेऽपि मदीयाः शत्रवो यदि बालकं निहत्य राज्यं गृह्णंति तर्ह्येषा मानहानिर्ममैवेति स ध्यानाच्चलितः, मनसैव वैरिभिः सार्धं तेन युद्धं कर्तुमारब्धं. अतिवरौद्ररूपतामापन्नस्तन्मना रौद्रं ध्यानं ध्यायति, मनसैव वैरिणं निहंति, हता इमे इति बुध्ध्या समीचीनं जातमिति मुखेनापि जल्पते, अधुनान्यं मारयामीति पुनरपि मनसा युद्धाय प्रवर्तते. एतस्मिन्नवसरे श्रेणिकेन हस्तिस्कंधाधिरूढेन प्रसन्नचंद्रो दृष्टः, अहो धन्योऽयं राजर्षियं एकाग्रमनसा ध्यानं करोति. श्रेणिकोऽपि गजादुत्तीर्य त्रिःप्रदक्षिणीकृत्य पुनः पुनर्वंदति स्तौति च. तं वंदित्वा मनसा स्तुवन् गजमारुह्य स्वामिसमीपमागतः, समवसरणं च दृष्ट्वा पंचाभिगमनविधिना जिनं वंदित्वा करकमलौ मूकुलीकृत्यैवं स्तौतिस्म. यदुक्तं—अद्याऽभवत्सफलता नयनद्वयस्य । देव त्वदीयचरणांबुजवीक्षणेन ॥ अद्य त्रिलोकतिलक प्रतिभासते मे । संसारवारिधिरयं चुलुकप्रमाणः ॥ १ ॥ दिठ्ठे तुह मूहकमले । तिन्निवि णठ्ठाइं निरवसेसाइं ॥ दारिद्दं दोहग्गं । जम्मंतरसंचियं पावं ॥ २ ॥ इत्याद्यष्टाधिकशतसंख्यैः काव्यैर्जिनं स्तुत्वा यथास्थानमुपविष्टः, प्रभुणा



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

क्लेशनाशिनी धर्मदेशनां प्रारब्धा देशनांते श्रेणिकः स्वामिनं पृच्छतिस्म. हे विभो यदवसरे मया प्रसन्नचंद्रो वंदितस्तदवसरे यदि स कालधर्मं प्राप्नोति तदा क गच्छति? स्वामिनोक्तं तदा सप्तमीं नरकपृथ्वीं याति, श्रेणिकेनोक्तं स्वामिन्नधुना क गच्छति? भगवतोक्तं षष्टीं नरकपृथ्वीं याति, पुनरपि श्रेणिकेन क्षणं विलंब्य पृष्टं अधुना क गच्छति ? भगवतोक्तं पंचमीं पृथ्वीं याति. पुनरपि क्षणं विलंब्य पृष्टं, भगवतोक्तं चतुर्थीं पृथ्वीं याति. एवं तृतीयायां द्वितीयायां, प्रथमायां, पुनरपि श्रेणिकेन पृष्टं प्रभो अधुना क गच्छति ? भगवतोक्तं प्रथमदेवलोके, एवं द्वितीये तृतीये चतुर्थे पञ्चमे षष्टे सप्तमे अष्टमे नवमे दशमे एकादशे द्वादशे च, एवमनुक्रमेण नवसु ग्रैवेयकेषु यावत्पञ्चानुत्तरविमानानि तावत्पर्यंतं श्रेणिकप्रश्नानंतरं भगवता तत्प्रश्नोत्तरं दत्तं. अनया रीत्या सभायां प्रश्नोत्तरनिर्णये जायमाने, अस्मिन्नवसरे नभसि देवदुंदुभिनिनादं निशम्य श्रेणिकेन पृष्टं, प्रभो क्वायं दुंदुभिनिनादः ? प्रभुणोक्तं प्रसन्नचन्द्रराजर्षेः केवलज्ञानं समुत्पन्नं, तत्र सुरा दुंदुभिं ताडयंति, जयजयारावः संजायते, श्रेणिकेनोक्तं प्रभो किमेतत्कौतुकं मया न ज्ञातं किमिदं स्वरूपं ? स्वामिन् कृपां विधायैतदुदंतं प्रसादीकुरु ? प्रभुणोक्तं श्रेणिक सर्वत्रापि मन एव प्रधानं. यदुक्तं—मन एव मनुष्याणां । कारणं बंधमोक्षयोः ॥ क्षणेन सप्तमीं याति । जीवस्तंडुलमत्स्यवत् ॥ १ ॥ तथा चोक्तं—मणमरणेंदियमरणं । इन्दिअमरणे मरंति कम्माइं ॥ कम्ममरणेण मुक्खो तम्हा मणमारणं पवरं ॥ २ ॥

भो श्रेणिक ! यदवसरे त्वया प्रसन्नचन्द्रोऽभिवंदितस्तदवसरे त्वदीयदंडधरदुर्मुखवचनं श्रुत्वा स ध्यानाच्चलितः, परसेनया युद्धं मनसैव करोतिस्म. त्वया त्वेवं ज्ञातं यन्महामुनीश्वरोऽयं एकाग्रमनसा ध्यानं ध्यायति, परंतु तेन तद-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वसरे वैरिभिः सार्द्धं मनसा महद्युद्धमारब्धमभूत् ततो युद्धेन सप्तमनरकगमनयोग्या आयुःपुद्गला मेलिताः, नतु निकाचितबंधेन बद्धाः, तदनु त्वं तं वंदित्वाऽत्रागतः, तेन तु मनसा युद्धे क्रियमाणे शस्त्रैः सर्वेऽपि शत्रवो निहताः, शस्त्राणि सर्वाण्यपि च व्ययितानि, शत्रवोऽपि सर्वे क्षयं नीताः, एतदवसरे एकः शत्रुः सन्मुखं स्थितः, शस्त्रं तु पार्श्वे न स्थितं, तदा प्रसन्नचन्द्रेण रौद्रध्यानपरायणेन मनसि विचारितं, शिरःस्थलोहमयेन पट्टेन वैरिणं ताडयामीति बुध्ध्या साक्षादेव हस्तौ तेन शिरसि न्यस्तौ. तत्कालं कृतकेशलुंचनं स्वं शिरो दृष्ट्वा स पश्चाद्वलितः, अहो धिग्मयाऽज्ञानांधितधिया रौद्रध्यानपरायणेन किं चिंतितं? त्यक्तसावद्यसंगस्य गृहीतयोगस्य वांतभोगस्य ममैतद्युद्धं न घटते. कस्य-सुतः! कस्य प्रजाः! कस्यांतःपुरं! अरे दुरात्मन्! त्वया किं विचारितं? सर्वमप्यनित्यं यदुक्तं—चला विभूतिः क्षणभंगि यौवनं। कृतांतदंतांतर्वर्ति जीवितं ॥ तथाप्यवज्ञा परलोकसाधने । अहो नृणां विस्मयकारि चेष्टितं ॥१॥ एवं शुभध्यानमापन्नः प्रतिक्षणं निकृष्टनिकृष्टतराध्यवसायबद्धानि कर्मदलिकान्युन्मूलयामास, शुभतराध्यवसायवशेन सप्तानामपि पृथिवीनां गमनायोग्यानि दलिकानि स्फेटयित्वोर्ध्वं यावत्सर्वार्थसिद्धिविमानगमनयोग्यं कर्मदलिकं मेलयित्वोत्तरोत्तरपरिणामकारूढः परमपदप्राप्तिपरमकारणं क्षपकश्रेणिस्वरूपमाश्रित्य घातिकर्मक्षयं विधाय तत्कालमेवोज्ज्वलं केवलज्ञानमाप. अतस्तत्प्रभावात्सुरा एकीभूय गीतगानादुत्सवं कुर्वंतीति श्रुत्वा श्रेणिकः सविस्मयं मुहुर्मुहुः शिरो धुन्वन् प्रभुं वंदित्वा

आ. के. श्री. कोबा

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

निस्संदेहो भूत्वा स्वथानं जगाम, प्रभुरप्यन्यत्र विजहार, प्रसन्नचन्द्रोऽपि बहुकालं यावत्केवलित्वेन भूमौ विहृत्य शिवपदमलंकृतवानित्युपनयः, अत एवात्मनः साक्षिकमाचरितं पुण्यपापं फलदायीति दृष्टांतः ॥

इति श्री प्रसन्नचन्द्राजर्षि चरित्रम् समाप्तम्.

॥ समाप्तोऽयं ग्रंथः गुरुश्रीमच्चारित्रविजयसुप्रसादात् ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ इति श्रीप्रसन्नचंद्रराजर्षिचरित्र समाप्तः ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust